संस्कृत

ग्रं.नं.१८९

स्तोत्र

नारदीय स्तोत्र

७९८/स्तो.९७

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ॥ श्रीरामचंद्रायनमः ॥ अगस्त्य उवाच ॥ पूजाविधानंव
क्ष्यामिनारदाभिमतंचयत् ॥ वाल्मीकायमुनींद्राय द्वारपूजादिकंतथा ॥१॥
आकर्णायमुनिश्रेष्ठ सर्वाभीष्टफलप्रदं ॥ श्रीरामद्वारपीठांगपरिवारत
थास्थिताः ॥२॥ येस्फुरास्तानिहस्तोमितन्मूलासिद्धयोयतः ॥ वंदेगणप
तिंभानुंतिलकःस्वामिनंशिवाम् ॥३॥ क्षेत्रपालंतथाधात्रीविधातार
मनंतरं ॥ गृहाधीशंगृहंगंगायमुनांकुलदेवतां ॥४॥ प्रचंडचंडौचतथा
शंखपद्मनिधीअपि ॥ वास्तोष्पतिंद्वारलक्ष्मींगुरुंवाराधिदेवतां ॥५॥
एताःसंपूज्यभक्त्याहंश्रीरामद्वारदेवताः ॥ महामंडूककालाग्निरुद्रा ॥राम॥
भ्यांप्रणमाम्यहं ॥६॥ आधारशक्तिकूर्माभ्यांनागाधिपतयेतथा ॥ पृथि ॥१॥
व्यैचतथाक्षीरसागरायनमोनमः ॥७॥ श्वेतद्वीपायरत्नाद्वीकस्यच

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1A)

क्षायतेनमः॥स्वर्णमंडपायाथ पुष्पकायमहार्हते॥८॥विमानायाष्ट
रत्नाय सम्यक्सिंहासनाय च॥उद्यदादित्य संशोभितात्माय तदनंत
रं॥९॥नमामि धर्मज्ञानाभ्यां वैराग्यायाग्नितः क्रमात्॥ऐश्वर्यायन
मो धर्मज्ञानाभ्यां पूर्वतस्तथा॥१०॥अवैराग्याय च तथानैश्वर्याय न
मो नमः॥ॐ अर्कमंडलायाहमुपर्युपरि सर्वदा॥११॥सत्वाय रजसे
नित्यं तमसेपि नमोनमः॥वं चंद्रमंडलाये हि ध्यात्वा ध्यात्वा नमाम्यह
म्॥१२॥रमग्निमंडलायेति संपूज्य च प्रयत्नतः॥विमलोत्कर्षिणी ज्ञा
ना क्रिया योगाख्य इत्यपि॥१३॥नमामि प्रह्वी सत्याभ्यामीशानायै द
लांतरे॥पूर्वादिदिग्वानुग्रहायै प्रणमामि तदंतरं॥१४॥नमो भगवते तद्धि
ह्लवेत दनंतरं॥सर्वभूतात्मने चेति वासुदेवाय इत्यपि॥१५॥ततः स

॥नारदीय ॥२॥

र्वात्मकायेति योगपीठायतेनमः॥प्रणवादिनमोंतोयंमंत्रःपीठात्मनेन ॥स्तोत्र॥
मः॥१६॥यजामहे भुवामोंह्रीं आत्मानाच व्यवस्थितो॥नमोत्तरं च रामा
यससीतायनमोनमः॥१७॥सांनिध्याधारयोगेननियतेनषडात्मना॥
व्यवस्थितायरामायनमोनंतायविष्णवे॥१८॥श्रीबीजाद्योपिसीतायै
स्वाहांतोयंषडक्षरः॥भेदेनमूलरूपायरामायज्योतिषेनमः॥१९॥सा
नुस्वारस्वरांतायवह्नयेत्हृदयाय च॥नमश्चैवेश्वरांतायस्वाहांतायरू
शानेन॥२०॥शिरसेप्यग्नयेवांनःशिखायैवषडात्मने॥ऐंतायवह्नये
निस्यंकवचायहुंमेनमः॥२१॥चतुर्दशस्वरांतायसानुस्वारायवह्नये ॥राम॥
॥नेत्राभ्यांवौषडंताय ए अस्त्रायफडात्मने॥२२॥एवंनमःषडंगात्मारा ॥२॥
मायज्योतिषेनमः॥आत्मांतरात्मपरमज्ञानात्मभ्योग्नितःक्रमात्॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai. "

२३॥ नित्यस्यै च प्रतिष्ठायै विद्यायै तेन नमाम्यहं॥ शान्त्यै चात्मादिशक्तिस्वे
स्थितस्ये लड्डूपिणे नमः॥२४॥ वासुदेवाय नित्यं तथा संकर्षणाय च
॥[illegible] प्रद्युम्नायानिरुद्धाय श्रियै वाण्यै नमो नमः॥२५॥ श्रीसीतेरत्यै भि
रामाय द्वितीयाचरणात्मने॥ अग्रे हनूमान् सुग्रीवो भरतश्च विभीष
णः॥२६॥ लक्ष्मणोप्यंगदश्चैव शत्रुघ्नो जांबवांस्तथा॥ धृष्टिर्जयं
तो विजयः सुराष्ट्रो राष्ट्रवर्धनः॥२७॥ अकोपो धर्मपालश्च सुमं
त्रश्चाष्टमंत्रिणः॥ एतेभ्यो रामरूपेभ्यो युष्मभ्यं प्रणमाम्यहं॥२८॥
इंद्राग्नियमदेवेभ्यः सायुधेभ्यो नमो नमः॥ नमो निर्ऋतये ताभ्यां वरु
णाय नमो नमः॥२९॥ वायवे धनदायाथ रुद्रायेशाय ते नमः॥ ब्रह्मणे नंदरु
पाय दिक्पालाय नमो नमः॥३०॥ तदायुधाय वज्राय शक्तये दंडकाय

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

॥नारदीय ॥३॥

च॥नमः स्कंदाय पाशाय ध्वजाय च गदात्मने॥३१॥त्रिशूलायांबु ॥स्तो॰अ॰॥
जायाथ चक्राय सततं नमः॥वसिष्ठो वामदेवश्च जाबालिर्गौतमस्त
था॥३२॥भरद्वाजः कौशिकश्च वाल्मीकिर्नारदस्तथा॥नलं नीलं
च गवयं गवाक्षं गंधमादनं॥३३॥शरभं चापि मैंदं च द्विविदं च यजे
त्क्रमात्॥शंखचक्रगदापद्मशार्ङ्गबाणात्मने नमः॥३४॥गरुत्मते
नमस्तुभ्यं विष्वक्सेनादिकाश्च ये॥सर्वैश्वर्यस्वरूपाय ज्योतिषे
सततं नमः॥३५॥मनोवाक्कायसहितं कर्म यद्वा शुभाशुभं॥तत्स
र्वं प्रीतये भूयान्नमो रामाय शार्ङ्गिणे॥३६॥एतद्रहस्यं सततं प्रत्यू ॥राम॥
षसि समाहितः॥यः पठेद्राममाहात्म्यं सर्वैश्वर्यनिधिर्भवेत्॥ ॥३॥
३७॥विनाशयेदसौभाग्यं दारिद्र्यौघं निकृंतयेत्॥उपद्रवांश्च शम

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

येत्सर्वलोकं वशं नयेत् ॥३९॥ यः पठेत्प्रातरुत्थाय ब्रह्मार्पणाधि
यान्वहं ॥ स याति शाश्वतं ब्रह्म पुनरावृत्तिदुर्लभं ॥४०॥ नारदीय
मिदं स्तोत्रं सुतीक्ष्ण मुनिसत्तम ॥ पठितव्यं प्रयत्नेन रामार्पणप
रायणैः ॥४१॥ इति श्री अगस्ति संहितायां श्रीनारदीयस्तोत्रं संपूर्णं
॥ श्रीमत्सीताराम चंद्रार्पणमस्तु ॥ श्रीरामः प्रीयतां न मम न मम ॥
शके १८०१ प्रमाथीनाम अधिक आश्विन कृष्ण २ गुरौ समाप्तः ॥
श्रीराम समर्थ ॥ श्रीरामो जयति ॥ श्रीराम प्रसन्न ॥ ॐ ॥ ॐ ॥ ॐ ॥

॥राम॥
॥७॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com